NEWJOBSINFO.IN A PATH FOR BRIGHT FUTURE

**CLASS : 12th (Sr. Secondary)** **Code No. 3605**

**Series : SS-M/2018**

रोल नं० | | | | | | | | | | |

***SET : B***

# संस्कृत

## SANSKRIT

### *ACADEMIC/OPEN*

(Only for Fresh/Re-appear Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

गङ्गा सर्वासां नदीनां श्रेष्ठा अस्ति। सा लोकत्रयस्य कल्याणकारिणी अस्ति। सा भौतिकसुखदृष्ट्या आध्यात्मिक सुखदृष्ट्या कल्याणप्रदा। यं गङ्गा पूर्णरूपेण समर्पितो-भवति, तस्य जीवनं धन्यं भवति। इह संसारे यः जनः राज्ञा भगीरथेन आनीतां भगवतीं गङ्गां सदा वन्दते स एव शोभनः चतुरः कथ्यते। यः जनः आदरपूर्वकं जह्नुतनयां मनसा ध्यायति, स एव सम्यक् तपस्वी भवति। यः गङ्गायाः नामानि गुणान् च सदा स्मरति, स एव श्रेष्ठः पुरुषः कथ्यते। यस्य जनस्य देवनदीं प्रति सेवाभावना अस्ति, यथार्थरूपेण स एव कर्मयोगी अस्ति, स एव सर्वेषां स्वामी भवति।

***प्रश्नाः*** – $2 \times 5 = 10$

(क) सर्वासां नदीनां श्रेष्ठा नदी का अस्ति ?

(ख) इह संसारे गङ्गां कः आनीतवान् ?

(ग) यः आदरपूर्वकं जह्नुतनयां ध्यायति सः किं भवति ?

(घ) यस्य देवनदीं प्रति सेवाभावना अस्ति, सः किम् अस्ति ?

(ङ) 'श्रेष्ठः' इत्यत्र कः प्रत्ययः ?

NEW JOBS INFO.in A PATH FOR BRIGHT FUTURE

**खण्डः 'ख'**

**(रचनात्मक-कार्यम्)**

**2.** ***विषयमेकमधिकृत्य*** लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) अनुशासनम्,

(ख) मम प्रियः कविः,

(ग) संस्कृतभाषायाः महत्त्वम्।

**खण्डः 'ग'**

## (पठित–अवबोधनम्)

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) चन्द्रापीडस्ताभिरुपदेशवाग्भिः प्रक्षालित इव, उन्मीलित इव, स्वच्छीकृत इव, पवित्रीकृत इव, उद्भासित इव, प्रीतहृदयो स्वभवनमाजगाम्।

**अथवा**

(ख) भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिनमपि दोषजातं गुरुपदेशः गुरुपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) नालम्बते दैष्टिकतां न निषीदति पौरुषे।

शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।।

**अथवा**

(ख) न कर्मणामनारम्भान्नैष्कर्म्यम् पुरुषोऽश्नुते।

न च सन्न्यसनादेव सिद्धिं समधिगच्छति।।

NEWS INFO.IN A PATH FOR BRIGHT FUTURE

**5.** अधोलिखितासु सूक्तिषु मात्र ***द्वयोः*** सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) तटाकोदरसंस्थानां परीवाह इवाम्भसाम्।

(ख) वाग्भूषणं भूषणम्।

(ग) द्वित्राण्यहान्यर्हसि सोढुमर्हन्।

(घ) सर्वे अश्रुलहृदयैः सौप्रस्थानिकीं ज्ञापितवन्तः।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तानानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

अहं देशसेवां कर्तुं गृहाद् बहिरभवम्। मया निश्चितमासीत् 'एतावन्ति दिनानि स्वोदरसेवायै क्लिष्टोऽभवम्। इदानीं कियन्तं कालं देशसेवायामपि लक्ष्यं ददामि।'

*प्रश्नाः* - 2 × 1 = 2

(क) किमर्थं बहिरभवम् ?

(ख) किमर्थं क्लिष्टोऽभवम् ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तरे लेखनीये –

अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः।

*प्रश्नाः* - 2 × 1 = 2

(क) के अन्धन्तमः प्रविशन्ति ?

(ख) 'विद्यायाम्' इति पदे कः शब्दः का विभक्तिश्च ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - 2 × 1 = 2

(क) विस्फारितशरासनाः आयुधीयश्रेणयः <u>कुमारं</u> तर्जयन्ति।

(ख) <u>कर्मणैव</u> हि संसिद्धिमास्थिता जनकादयः।

**खण्डः 'घ'**

**(संस्कृत-साहित्य-परिचयः)**

**9.** भवभूतेः ***अथवा*** अम्बिकादत्तव्यासस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

NEWS INFO.IN

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः - 4

(i) उत्तररामचरितम्,

(ii) समुद्रसङ्गमः।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्र***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत – 2 × 4 = 8

(i) इन्द्रवज्रा,

(ii) वंशस्थः,

(iii) शार्दूलविक्रीडितम्।

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – 2 × 4 = 8

(i) अनुप्रासः,

(ii) उपमा,

(iii) अन्योक्तिः।

## खण्डः 'च'

## (अनुप्रयुक्त-व्याकरणम्)

**13.** (क) गुणसन्धेः ***अथवा*** व्यञ्जनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) कर्त्ताकारकस्य ***अथवा*** सम्प्रदानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) तत्पुरुषसमासस्य ***अथवा*** द्विगुसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

## खण्डः 'छ'

## [ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]

**14.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 16 × 1 = 16

(क) 'कुर्वन्नेवेह' इति पदे कः सन्धिविच्छेदः ?

(i) कुर्व + नेवह (ii) कुर्वन् + एव + इह

(iii) कुर्वन् + इव + एव (iv) कुर्व + न + इव

(ख) 'पुरुषः + अश्नुते' इति पदे किं सन्धिपदम् ?

(i) पुरुषोश्नुते (ii) पुरुषोऽश्नुते

(iii) पुरुषस्श्नुते (iv) पुरुषोशनुते

(ग) 'कोऽयम्' इति पदे कः सन्धिः ?

(i) दीर्घसन्धिः (ii) यणसन्धिः

(iii) अयादिसन्धिः (iv) विसर्गसन्धिः

(घ) 'उपकृष्णम्' इति पदे विग्रहोऽस्ति –

(i) कृष्णस्य समीपम् (ii) कृष्णम् इति

(iii) कृष्णाय समीपम् (iv) कृष्णः परम

(ङ) 'नखभिन्नः' इति पदे कः समासः ?

(i) चतुर्थीतत्पुरुषः (ii) सप्तमीतत्पुरुषः

(iii) पञ्चमीतत्पुरुषः (iv) तृतीयातत्पुरुषः

(च) 'दीर्घा ग्रीवा यस्य सः' इति विग्रहे किं समस्तपदम् ?

(i) दीर्घग्रीवः (ii) दीर्घाग्रीवा

(iii) दीर्घो ग्रीवः यस्या सा (iv) दीर्घस्य ग्रीवा

(छ) 'राम' प्रथमा द्विवचने रूपम् –

(i) रामयोः (ii) रामौ

(iii) रामान् (iv) रामम्

(ज) 'अग्नये' इति पदे का विभक्तिः ?

(i) प्रथमा (ii) चतुर्थी

(iii) सप्तमी (iv) द्वितीया

(झ) 'आस्ताम्' इति पदे कः धातुः ?

(i) भू (ii) आस्

(iii) भाव (iv) अस्

(ञ) 'बिभ्यति' इति पदे कः पुरुषः ?

(i) प्रथमपुरुषः (ii) उत्तमपुरुषः

(iii) अन्यपुरुषः (iv) मध्यमपुरुषः

(ट) 'लब्ध्वा' इति पदे कः प्रत्ययः ?

(i) क्तः (ii) क्त्वा

(iii) यत् (iv) ल्यप्

(ठ) 'परि + त्यज् + ल्यप्' एषां संयोगे किं रूपम् ?

(i) परित्यजय (ii) परित्यज्य

(iii) परित्याग (iv) परित्यजाय

(ड) 'साकम्' इति उपपदयोगे का विभक्तिः ?

(i) द्वितीया (ii) चतुर्थी

(iii) तृतीया (iv) पञ्चमी

NEWS INFO.IN A PATH FOR BRIGHT FUTURE

(ढ) 'नरे' इति पदस्य समानार्थकपदमस्ति –

(i) मनुष्ये (ii) जीवने

(iii) भारे (iv) नारे

(ण) 'अधीतशास्त्रस्य' इति पदस्य विशेष्यम् –

(i) त्वम् (ii) भवति

(iii) ते (iv) अस्माकम्

(त) 'उभयम्' इति पदस्य विलोमपदमस्ति –

(i) एकम् (ii) अनेकम्

(iii) द्वित्व (iv) सभयम्

NEW JOBS INFO.IN
A PATH FOR BRIGHT FUTURE